A First EPQRST Journal-www.jahnavisanskritejournal.com, Issue-17th, Vol.-V, 14.1.14
ISSN 976-8645

# संस्कृतसाहित्यदृशा तत्समविवेचनपुरस्सरं सामासिकसंस्कृतिविमर्शः

बिपिनकुमार झा

कूटशब्दाः सामासिकसंस्कृतिः, भारतीयापरम्परा, संस्कृतम्।

*नैकाः आधुनिकविद्याः एतादृश्यः वर्तन्ते यासामध्ययनेन भारतीयप्राच्यविद्यानां सातत्यस्थापनं कठिनं कार्यं प्रतीयते। भारतीयसंस्कृतिप्रेमिजनाः तत्र असहमतिं प्रस्तुवन्ति। तेषामिदं चिन्तनं यत भारतीयपरम्परां तिरस्कृत्य पाश्चात्यसिद्धान्तस्थापनं स्यात् इति सर्वथा असम्यक् अस्ति। तन्मतानुसारेण भारतीयप्राचीनविद्यासु एव आधुनिकविद्यानां विचारः बीजरूपे सम्प्राप्यते। उक्तपरिदृश्ये मैकाले बाह्य वा शिक्षायोजना उत्तरदायिनी वर्तते अथवा भारतीयपरम्परायामस्मदीयानामधानुकरणपरकदृष्टिः अत्रैषो विवेच्यविषयो न।*

*प्रकृतेऽस्मिन् शोधपत्रे उक्तस्थितिरिव भारतवर्षे 'भारतीयभाषामुपेक्ष्य व्यतिक्रमे सति आङ्ग्लानुवादो ग्राह्यः' एषा परिपाटी कथं तिरस्कृता स्यादपि च भारतीय संविधानोक्तसंस्कृताश्रितायाः सामासिकसंस्कृतेः विकासः कथं स्यातदिति विमर्शो विद्यते।*

भारतवर्षोऽयं विविधतायमेकतेति वैशिष्ट्यं दधानो देशो वर्तते। विविधेषु प्रान्तेषु विविधभाषाणां प्रयोगो जायते। तत्र ऐक्यं कथं स्यात् इति धिया भारतीयसंविधाननिर्मातृभि सामासिकसंस्कृतिः पदप्रयोगः कृतः अपि च संस्कृतस्य महत्वख्यापनं तत्र विहितम्। प्राच्यसाहित्येऽपि शब्दप्रयोगस्य भाषाप्रयोगस्य च स्पष्टम् उदाहरणं दृश्यते यथा–

**सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक्**
**वेदशब्देभ्य एवादौ पृथक् संज्ञाश्च निर्ममे।**[1]

अस्मदीया प्राच्यपरम्परा भावादीनां वस्तुप्रभृतीनां च नामकरणार्थम् आधाररूपे वैदिकशब्दनाम् एव आदौ ग्रहणं कुरुते अपि च नूतनशब्दनिर्माणे अविच्छिन्नप्राच्यसाहित्यस्यानुगमनं स्यात् इति निगदति। संविधानस्य हिन्द्याऽनुवादकालेऽपि एतस्याः एव अवधारणायाः अनुगमनम् अभूत्। उदाहरण रूपे अधोलिखितशब्दानां विमर्शः द्रष्टव्यः–

| क्रम | आङ्गलशब्दाः | सामान्यार्थाः | प्राच्यानुसारिप्रयुक्तार्थाः |
|---|---|---|---|
| 1. | Quorum | अनिवार्यसंख्या | गणपूर्तिः |
| 2. | Secret Ballot | गुप्तमतदानम् | शालाकपद्धतिः |

अद्यापि व्यावहारिकदृष्ट्या शलाकापद्धतिपदस्यापेक्षा गुप्तमतदानम् इत्यस्यैव प्रयोगो दृश्यते। जगदीशभट्टाचार्यः (शब्दशाक्तिप्रकाशिकाप्रणेता) तथा गदाधरः (शब्दशक्तिवादप्रणेता) प्रभृतयः आचार्या अपि स्वकीयेषु ग्रन्थेषु पारिभाषिकशब्दानाम् आधुनिकसंज्ञा कथं स्यात् इति विवेचनं कृतवन्तः सन्ति। येषां प्रयोगः नूतनपदानां अर्थनिधारणक्रमे प्रसंगानुसारः कृतः वर्तते खलु–

| | | |
|---|---|---|
| 1. | राज्यम् (State) | प्रान्तम् |
| 2. | अध्यक्षः (अक्षिसम्बन्धः) | Speaker (वाक्–सम्बन्धः) |

एवमेव 'विष' शब्दस्य कृते आङ्ग्लभाषायां पद्द्वयं वर्तते Poisson तथा Toxin इति। उदाहरणं द्रष्टव्यम्[2]

***Toxic food poising is caused by the endotoxins and exotoxins produced by some species or strains bacteria.***

अत्र Poision तथा toxin उभयोः अर्थः विषम् एव भवति किन्तु प्रसंगानुसारेण क्रमशः विषं तथा आविषं (विषवत्) इति स्वीकृतः विद्वद्भिः व्यवहारे। सर्पविषस्य संकल्पना अपि तादृशी एव वर्तते, किन्तु सर्वत्र संकल्पना व्यवहारे न प्रयुज्यते। यथाहि–

***The sting of scorpions can cause serious poisoning due to toxins present in the venom secreted by the poisonous glands located in the last segment of the tail.***[3]

अत्र सर्पविषस्य संकल्पना नहि स्वीकर्तुं शक्यते यतोहि अत्र प्रसङ्गः वर्तते 'वृश्चिकस्य' अतो जीवविषस्य कल्पना कृता तथा जीविषम् इति पदप्रयोगः अभूत।

यथा शास्त्रीयचर्चाक्रमे पारिभाषिकपदानां प्राच्यदृष्टिः अङ्गीकृता वर्तते तथैव अस्मदीयं संविधानं नूनमेव संस्कृतस्यापरिहार्यता दर्शयति। सामासिकसंस्कृतिसन्दर्भे तत्र स्पष्टरूपे कथनं विद्यते यत्–

ISSN 976-8645

***'संघ का यह कर्त्तव्य होगा कि वह हिन्दी भाषा का प्रसार बढाए, उसका विकास करे, जिससे वह सामासिक संस्कृति के सभी तत्वों की अभिव्यक्ति का माध्यम बन सके और उसकी प्रकृति में हस्तक्षेप किए बिना हिन्दुस्थानी में और आठवीं अनुसूची में विनिर्दिष्ट भारत की अन्य भाषाओं में प्रयुक्त रुप, शैली पदों को आत्मसात कहते हुए और जहाँ आवश्यक या वाछनीय हो वहाँ उसके शब्द भण्डार के लिए मुख्यत: संस्कृत से और गौणात: अन्य भाषाओं से शब्द ग्रहण करते हुए उसकी समृद्धि सुनिश्चित करे।'***[4]

अत्र सामासिकसंस्कृति समृद्ध्यर्थं शब्दभण्डारेसंस्कृतपदानामङ्गीकरणं स्यात् इति स्पष्टं विहितं वर्तते। एतत् एव पदं तत्समपदरूपे अंगीकृतं विद्वद्भि:।

तत्समपदस्य कोऽभिप्राय: इति प्रश्नस्य समाधानम् आदौ नाट्यशास्त्रे बीजरूपे मिलति तत्स्मात् पूर्वं तु वैदिकसंस्कृतस्य प्रयोग: लौकिकसंस्कृते कुर्वन्त: अपि मनीषिण: अधोलिखितानैकवैदिकशब्दानाम् अर्थरक्षणं नैव कृतवन्त: खलु।

| क्रम. | वैदिकशब्दा | अर्थ: |
|---|---|---|
| 1. | अन्धस् | सोमलतारस: |
| 2. | आपि | मित्रम् |
| 3. | दशम: | चतुर: |
| 4. | अक्तम् | वस्त्रम् |

अत्र एतेषां पदानां प्रयोगस्य आशय: अस्ति शब्दप्रवाह: कालानुरूपं कथं जायते इति प्रदर्शनमात्रम्। भरतस्तु नाट्यशास्त्रे तत्समपदस्य संकेतमात्रं प्रस्तौति–

**त्रिविधं तच्च विज्ञेयं नान्ययोगे समासत:।**
**समानशब्दविभ्रमं देशीगतमथापि च।**[5]

दण्डी स्वकीये ग्रन्थे काव्यदर्शे स्पष्टरुपे एवास्य वर्णनं करोति–

**संस्कृतं नाम् दैवीवाक् अन्वाख्याता महर्षिभि:**
**तद्भवस्ततस्मो देशीत्यनेक प्राकृतिरक्रम:।**[6]

आचार्य: धनिक: दशरुपके समानं मतमेव प्रस्तौति।[7] नामिसाधु:[8], वाक्यपतिराज:[9], वात्स्यायनश्चापि[10] भाषाविवेचनक्रमे स्वकीयान् मतान् प्रस्तुवन्ति तत्समपदस्य य: प्रयोग: मनीषिभि:

कृतः स एवं प्रयोगः पुनः भाषादृशा आराष्ट्रसम्बद्र्धनार्थं अर्वाचीनकाले सामासिकसंस्कृति इत्यभिधानरूपे यत्नपूर्वकं क्रियते। यथा हि पूर्वम् उक्तं संविधानस्य अनुच्छेदेषु (120[11], 210[12], 343[13], 344[14], 345[15], 346[16], 347[17], 348[18], 349[19], 350[20], 351[21]) भाषासन्दर्भिता चर्चा कृता अस्ति, तत्र स्पष्टतया शब्दविनिर्माणमित्तं संस्कृतपदानाम् अनुगमनं स्यात् इति निर्देशः प्राप्यते खलु। एतस्यैव परिपालनं केन्द्रीय–हिन्दी–निर्देशालये[22] अपि च वैज्ञानिक–तथा–तकनीकि–आयोगप्रभृतिभिः मनोयोगेन क्रियते।

सामासिकसंस्कृतिविनिर्माणे सङ्गाणकीयसंस्कृतस्यापि उपादेयता तदैव ग्राह्या भविष्यति यदा तत्समबहुलभाषायाः प्रयोगः समाजे, कार्यालयेषु च भविष्यति।

अत्र ध्यातव्यो वर्तते यत् तत्समपदानामपि प्रयोगः विविधरूपे दृश्यते। यस्य परिवर्तनवैशिष्ट्यमवधातव्यं वर्तते खलु। क्वाचित् तु शब्दविनिर्माण स्वेच्छानुसारिणी प्रवृत्तिः दृश्यते, क्वाचित् प्रमादवशात् 'अनुचितशब्दः' उचितपदरूपे प्रयुज्यते अस्माकं व्यवहारे यथा हि–

1. 'कम्प्यूटरीकृत' अत्र 'कम्प्यूटर' तु आङ्ग्लशब्दः किन्तु कृतः 'कृ'धातोः कृत्प्रत्यायन्तपदम्।
2. 'प्लाष्टिकप्रणयः' अत्र 'प्लाष्टिक' तु आङ्ग्लशब्दः 'प्रणयः' तत्समपदम्।

निष्कर्षरूपे इह शोधपत्रस्याभिव्यक्तिः एवं भवितुमर्हति–यत् यदि भाषादृष्ट्या आराष्ट्रस्य एकीकरणार्थं प्रयासः एव वर्तते अस्माकं लक्ष्यं, तर्हि न केवलं सर्वकारस्य प्रयासः अलम्। एतस्य कृते समेषां यत्नः अपेक्षितः खलु। दैनान्दिन वाग्व्यवहारे यदि सर्वे भाषाभाषिणः (भाषा स्यात् उत्बोली स्यात्) तत्समबहुलप्रयोगः करिष्यन्ति। तर्हि भाषासु विकृतिः न समागमिष्यति अपि च भाषासमृद्धतां यास्यति। एषा एव परिकल्पना सामासिकसंस्कृतेः आधारः भविष्यतीतिनात्र सन्देहः कश्चन।

## अन्तटिप्पणी

1. मनुस्मृति 1/21
2. सक्सेना, पृ. 13
3. तत्रैव
4. संविधान, अनु. 351, पृ.
5. नाट्यशास्त्रम् 17.3
6. काव्यादर्शः 1.33
7. दशरुपकम् श्लोक 60
8. प्राकृतेति ................ संस्कृतमुच्यते। प्राकृताभिलेख पृ. 61
9. गाउऽवहो पृ. 71
10. कामसूत्रम् 1/4/37

ISSN 976-8645

11. भारत का संविधान पृ. 64
12. तत्रैव पृ. 107
13. तत्रैव पृ. 198
14. तत्रैव पृ. 199
15. तत्रैव पृ. 200
16. तत्रैव
17. तत्रैव
18. तत्रैव
19. तत्रैव पृ. 201
20. तत्रैव पृ. 202
21. तत्रैव पृ. 202
22. http://hindinideshalaya.nic.in/hindi/index.html, visited on 8.1.2014

# सन्दर्भग्रथसूची


1. Manusmriti, Tran. Madhukar Dash Pandey, South Asia book ISBN 978-81715457-59, Delhi 1993.
2. आर्य, बीर सिंह, वैज्ञानिक शब्दावली अनुवाद एवं मौलिक लेखन, वैज्ञानिक तथा तकनीकी शब्दावली आयोग, मानवसंसाधन विकास मन्त्रालय, भारत सरकार, नई दिल्ली, 1996
3. भारत का संविधान सप्तमसंस्करण, सेण्ट्रल लॉ पब्लिकेशन्स, इलाहाबाद, 2008
4. नाट्यशास्त्रम्, सम्पा. रविशंकरनागर, परिमल प्रकाशन, दिल्ली 1983
5. दशरूपकम्, सम्पा. राजेश्वरशास्त्री, मुसलगाँवकर,चौखम्बासंस्कृतभवन, वाराणसी 2057
6. त्रिपाठी, प्रो. राधावल्लभ, प्राकृत भाषा और व्याकरण विविध आयाम, राष्ट्रिय संस्कृत संस्थान नवदेहली, 2012
7. काव्यादर्श : दण्डी, (सम्पा. एवं व्या.), रामचन्द्र मिश्र, विद्याभवन संस्कृत ग्रन्थमाला, चौखम्बा विद्याभवन, वाराणसी, 1958